**19E**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

## संस्कृत विशारद (बी.ए.) बहि:स्थ

## परीक्षा: डिसेंबर – २०२३

## सत्र ४ थे

**विषय: भारतचम्पू** (19E444)

| दिनांक: १९/१२/२०२३ | गुण : ८० | वेळ : दु. २.०० ते ५.०० |
|---|---|---|

**सूचना:** १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

**प्र.१. केषामपि चतुर्णां स्वाभाषया अनुवादं करणीयम्।** (२४)

१) एकदा सायमन्तगृहे निरवग्रहं निष्पतद्भिर्बाष्पैस्तरङ्गितोत्तमाङ्गमुत्सङ्गभुवि पत्युरपत्यं पुरोधाय यातुधानापराधभयानुरोधेन मन्दितं क्रन्दितमुत्सृजन्तीं कुन्तीं समुपसृत्य विषादनिदानं विप्रायताक्षीमप्राक्षीत्। सापि तां कृपालुतया हृदि लगद्गदां गद्गदाक्षरमाचचक्षे।।

२) या खलु पुरा कुरुधराधिपापराधसमेधितक्रोधेन हलधरेण निजायुधेन हठात्कर्षणशिक्षया तत्क्षणं समुत्क्षिप्तदक्षिणक्षितिभागा तदीयभुवनभूषणायमानां भोगावतीमात्मना विजेतुं भागीरथीपाथः पथेनावतीर्य कृतप्रस्थानेवाद्यापि दृश्यते।।

३) सन्तानमूलमिदमेकमपत्यमास्ते संवर्तकालसहजश्च स राक्षसेन्द्रः।<br>सम्भूयते च समयः क्षपया महत्या सन्तीर्यतां कथमियं सखि मे विपत्तिः।

४) मा भून्नाशो युगपदिति नो भीरुभिर्जातु पौरैः पूर्वैर्लब्ध्वावसरमसकृत्प्रार्थनाभिः प्रक्लृप्तम्।<br>एकैकस्मिन्नहनि वितरत्येकमेकं पुमांसं कृत्वा तस्मै बलिमिह जनस्तुङ्गमन्नस्य राशिम्।।

५) अथ कदाचन मृगयोपलालितहृदयो नरेश्वरोऽयमश्वे शशिश्वेततेजसि विश्वातिशायिनि रयविजितमातरिश्वनि कृताधिरोहः। पार्श्वघृतविश्वकद्रुभिरनेकवागुरोपकरणानुरोधैर्योधैरनुद्रुतो मृदुभद्रविनयाभ्यां यदुमद्रतनयाभ्यामनुविद्धः सिद्धगणगणनीयमहिमवतो हिमवतोऽवजगाहे महतीमटवीतटवीथिकाम्।।

६) अष्टाङ्गयोगानवतोऽस्य राज्ञो मिष्टान्नमासीन्मृदु कन्दमूलम्। गर्भो वनस्याजनि केलिसौधो दर्भोऽपि सिंहासनतां जगाहे।।

**प्र.२. त्रयाणां वाक्यानां ससन्दर्भं स्पष्टीकरणं लिखत।** (२४)

१) पञ्चतामपि परां धनञ्जयप्राणेन जतुधाम्नि मेनिरे।

२) कुर्यावः स्मृत एव कर्मसु हरेः शक्तेरपि स्रंसनाम्।

३) निन्द्यन्ते पितृभिस्तप्तैर्निरपत्यधनः पुमान्।

४) मलिनतामनयन्त कलेवरं मदकलाः कलभा इव धूलिभिः।

५) बाणशापप्रयोगाभ्यां बाधितौ तावुभावपि।

**प्र.३. सविस्तरं द्वौ लिखत।** (२२)

१) पाण्डोः मृगया

२) भीमवृन्तातः

३) लाक्षागृहवृत्तान्तः

**प्र.४. अ) रूपपरिचयं लिखत।** (०४)

१) एतस्मै

२) पितृभिः

३) समीक्ष्य

४) धार्यमाणम्

**आ) संधिविग्रहं कुरुत।** (०३)

१) हिमवतोऽवजगाहे

२) निष्पतद्भिर्बाष्पैस्तरङ्गित

३) किमभीष्टतापदे

**इ) समासानां नामनिर्देशपूर्वकं विग्रहं कुरुत।** (०३)

१. शिशिरांशुबिम्बे २. मुग्धजनाः ३. तटवीथिका

-----------------